# अष्टमः परिच्छेदः

गुणानाह—

**रसस्याङ्गित्वमाप्तस्य धर्माः शौर्यादयो यथा ।**

**गुणाः—**

यथा खल्वङ्गित्वमाप्तस्यात्मन उत्कर्षहेतुत्वाच्छौर्यादयो गुणशब्दवाच्याः, तथा काव्ये ऽङ्गित्वमाप्तस्य रसस्य धर्माः स्वरूपविशेषा माधुर्यादयोऽपि स्वसमर्पकपदसन्दर्भस्य काव्य-व्यपदेशस्यौपयिकानुगुण्यभाज इत्यर्थः । यथा चैषां रसमात्रस्य धर्मत्वं तथा दर्शितमेव ।

**माधुर्यमोजोऽथ प्रसाद इति ते त्रिधा ।। १ ।।**

ते गुणाः । तत्र —

**चित्तद्रवीभावमयो ह्लादो माधुर्यमुच्यते ।**

यत्तु — केनचिदुक्तम् — 'माधुर्यं द्रुतिकारणम्' इति तन्न, द्रवीभावस्यास्वाद-स्वरूपाह्लादाभिन्नत्वेन कार्यत्वाभावात् । द्रवीभावश्च स्वाभाविकानाविष्टत्वात्मक-काठिन्यमन्युक्रोधादिकृतदीप्तत्वविस्मयहासाद्युपहितविक्षेपपरित्यागेन रत्याद्याकारानुविद्धा-नन्दोद्बोधेन सहृदयचित्तार्द्रप्रायत्वम् । तच्च —

**संभोगे करुणे विप्रलम्भे शान्तेऽधिकं क्रमात् ।। २ ।।**

सम्भोगादिशब्दा उपलक्षणानि । तेन सम्भोगाभासादिष्वप्येतस्य स्थितिर्ज्ञेया ।

**मूर्ध्नि वर्गान्त्यवर्णेन युक्ताष्टठडढान्विना ।**

**रणौ लघू च तद्व्यक्तौ वर्णाः कारणतां गताः ।। ३ ।।**

**अवृत्तिरल्पवृत्तिर्वा मधुरा रचना तथा ।**

यथा —

'अनङ्गमङ्गलभुवस्तदपाङ्गस्य भङ्गयः ।

Scanned with CamScanner

'लताकुञ्जं गुञ्जन् मदवदलिपुञ्जं चपलयन्

समालिङ्गन्नङ्गं द्रुततरमनङ्गं प्रबलयन् ।

मरुन्मन्दं मन्दं दलितमरविन्दं तरलयन्

रजोवृन्दं विन्दन् किरति मकरन्दं दिशि दिशि ।।'

**ओजश्चित्तस्य विस्ताररूपं दीप्तत्वमुच्यते ।। ४ ।।**

**वीरबीभत्सरौद्रेषु क्रमेणाधिक्यमस्य तु ।**

अस्यौजसः । अत्रापि वीरादिशब्दा उपलक्षणानि । तेन वीराभासादावप्यस्यावस्थितिः।

**वर्गस्याद्यतृतीयाभ्यां युक्तौ वर्णौ तदन्तिमौ ।। ५ ।।**

**उपर्यधो द्वयोर्वा सरेफौ टठडढैः सह ।**

**शकारश्च षकारश्च तस्य व्यञ्जकतां गताः ।। ६ ।।**

**तथा समासो बहुलो घटनौद्धत्यशालिनी ।**

यथा— 'चञ्चद्भुज-' इत्यादि ।

**चित्तं व्याप्नोति यः क्षिप्रं शुष्केन्धनमिवानलः ।। ७ ।।**

**स प्रसादः समस्तेषु रसेषु रचनासु च ।**

व्याप्नोति, आविष्करोति ।

**शब्दास्तद्व्यञ्जका अर्थबोधकाः श्रुतिमात्रतः ।। ८ ।।**

यथा —

'सूचीमुखेन सकृदेव कृतव्रणस्त्वं

मुक्ताकलाप ! लुठसि स्तनयोः प्रियायाः ।

Scanned with CamScanner

बाणैः स्मरस्य शतशो विनिकृत्तमर्मा

स्वप्नेऽपि तां कथमहं न विलोकयामि ।।'

एषां शब्दगुणत्वं च गुणवृत्त्योच्यते बुधैः ।

'शरीरस्य शौर्यादिगुणयोग इव' इति शेषः ।

श्लेषः समाधिरौदार्यं प्रसाद इति ये पुनः ।। ।।

गुणाश्चिरन्तनैरुक्ता ओजस्यन्तर्भवन्ति ते ।

ओजसि भक्त्या ओजः पदवाच्ये शब्द (अर्थ) धर्मविशेषे । तत्र श्लेषो बहूनामपि पदानामेकपदवद्भासनात्मा । यथा —

'उन्मज्जज्जलकुञ्जरेन्द्ररभसास्फालानुबन्धोद्धताः

सर्वाः पर्वतकन्दरोदरभुवः कुर्वन् प्रतिध्वानिनीः ।

उच्चैरुच्चरति ध्वनिः श्रुतिपथोन्माथी यथायं तथा

प्रायप्रेंखदसंख्यशङ्खधवला वेलेयमुद्गच्छति ।।'

अयं बन्धवैकट्यात्मकत्वादोज एव । समाधिरारोहावरोहक्रमः । आरोह उत्कर्षः, अवरोहोऽपकर्षः, तयोः क्रमो वैरस्यतानावहो विन्यासः । यथा — 'चञ्चद्भुज-' इत्यादि । अत्र पादत्रये क्रमेण बन्धस्य गाढता । चतुर्थपादे त्वपकर्षः । तस्यापि च तीव्रप्रयत्नोच्चार्यतया ओजस्विता । उदारता विकटत्वलक्षणा । विकटत्वं पदानां नृत्यत्प्रायत्वम् ।

यथा —

'सुचरणविनिविष्टैर्नूपुरैर्नर्तकीनां

झणिति रणितमासीत्तत्र चित्रं कलं च ।'

अत्र च तन्मतानुसारेण रसानुसन्धानमन्तरेणैव शब्दप्रौढोक्तिमात्रेणौजः । प्रसाद ओजोमिश्रितशैथिल्यात्मा । यथा —

'यो यः शस्त्रं बिभर्ति स्वभुजगुरुमदः पाण्डवीनां चमूनाम्' इति ।

**माधुर्यव्यञ्जकत्वं यदसमासस्य दर्शितम् ।। १० ।।**

**पृथक्पदत्वं माधुर्यं तेनैवाङ्गीकृतं पुनः ।**

यथा— 'श्वासान्मुञ्चति—' इत्यादि ।

**अर्थव्यक्तेः प्रसादाख्यगुणेनैव परिग्रहः ।। ११ ।।**

**अर्थव्यक्तिः पदानां हि झटित्यर्थसमर्पणम् ।**

स्पष्टमुदाहरणम् ।

**ग्राम्यदुःश्रवतात्यागात्कान्तिश्च सुकुमारता ।। १२ ।।**

अङ्गीकृतेति सम्बन्धः । कान्तिरौज्ज्वल्यम् । तच्च हालिकादिपदविन्यासवैपरीत्येन लौकिकशोभाशालित्वम् । सुकुमारता अपारुष्यम् । अनयोरुदाहरणे स्पष्टे ।

**क्वचिद्दोषस्तु समता मार्गाभेदस्वरूपिणी ।**

**अन्यथोक्तगुणेष्वस्या अन्तःपातो यथायथम् ।। १३ ।।**

मसृणेन विकटेन वा मार्गेणोपक्रान्तस्य सन्दर्भस्य तेनैव परिनिष्ठानं मार्गाभेदः । स च क्वचिद्दोषः । तथाहि —

'अव्यूढाङ्गमरूढपाणिजठराभोगं च बिभ्रद्वपुः

पारीन्द्रः शिशुरेष पाणिपुटके सम्मातु किं तावता ।

उद्यद्दुर्धरगन्धसिन्धुरशतप्रोद्दाममदानार्णव-

स्रोतःशोषणरोषणात्पुनरितः कल्पाग्निरल्पायते ।।'

Scanned with CamScanner

अत्रोद्धतेऽर्थे वाच्ये सुकुमारबन्धत्यागो गुण एव । अनेवंविधस्थाने माधुर्यादावेवान्तःपातः । यथा— 'लताकुञ्जं गुञ्जन्—' इत्यादि ।

**ओजः प्रसादो माधुर्यं सौकुमार्यमुदारता ।**

**तदभावस्य दोषत्वात्स्वीकृता अर्थगा गुणाः ।। १४ ।।**

ओजः साभिप्रायत्वरूपम् । प्रसादोऽर्थवैमल्यम् । माधुर्यमुक्तिवैचित्र्यम् । सौकुमार्यमपारुष्यम् । उदारता अग्राम्यत्वम् । एषां पञ्चानामप्यर्थगुणानां यथाक्रममपुष्टार्थाधिकपदानवीकृतामङ्गलरूपाश्लीलग्राम्याणां निराकरणेनैवाङ्गीकारः । स्पष्टान्युदाहरणानि ।

**अर्थव्यक्तिः स्वभावोक्त्यलङ्कारेण तथा पुनः ।**

**रसध्वनिगुणीभूतव्यङ्ग्यानां कान्तिनामकः ।। १५ ।।**

अङ्गीकृत इति सम्बन्धः । अर्थव्यक्तिर्वस्तुस्वभावस्फुटत्वम् । कान्तिर्दीप्तरसत्वम् । स्पष्टे उदाहरणे ।

**श्लेषो विचित्रतामात्रमदोषः समता परम् ।**

श्लेषः क्रमकौटिल्यानुल्वणत्वोपपतियोगरूपघटनात्मा । तत्र क्रमः क्रियासन्ततिः, विदग्धचेष्टितं कौटिल्यम्, अप्रसिद्धवर्णनाविरहोऽनुल्वणत्वम्, उपपादकयुक्तिविन्यास उपपत्तिः, एषां योगः सम्मेलनं स एव रूपं यस्या घटनायास्तद्रूपः श्लेषो वैचित्र्यमात्रम् । अनन्यसाधारणरसोपकारित्वातिशयविरहादितिभावः । यथा —

'दृष्ट्वैकासनसंस्थिते प्रियतमे—' इत्यादि ।

अत्र दर्शनादयः क्रियाः, उभयसमर्थनरूपं कौटिल्यम्, लोकव्यवहाररूपमनुल्बणत्वम्, 'एकासनसंस्थिते' 'पश्चादुपेत्य' 'नयने पिधाय' 'ईषद्वक्रितकन्धरः' इति चोपपादकानि, एषां योगः । अनेन च वाच्योपपत्तिग्रहणव्यग्रतया रसास्वादो व्यवहितप्राय इत्यस्यागुणता ।

Scanned with CamScanner

समता च प्रक्रान्तप्रकृतिप्रत्ययाविपर्यासेनार्थस्य विसंवादिताविच्छेदः । स च प्रक्रमभङ्गरूपविरह एव । स्पष्टमुदाहरणम् ।

**न गुणत्वं समाधेश्च—**

समाधिश्चायोन्यन्यच्छायायोनिरूपद्विविधार्थदृष्टिरूपः । तत्रायोनिरर्थो यथा —

'सद्योमुण्डितमत्तहूणचिबुकप्रस्पर्धि नारङ्गकम् ।'

अन्यच्छायायोनिर्यथा —

'निजनयनप्रतिबिम्बैरम्बुनि बहुशः प्रतारिता काऽपि ।
नीलोत्पलेऽपि विमृशति करमर्पयितुं कुसुमलावी ।।'

अत्र नीलोत्पलनयनयोरतिप्रसिद्धं सादृश्यं विच्छित्तिविशेषेण निबद्धम् । अस्य चासाधारणशोभानाधायकत्वान्न गुणत्वम्, किन्तु काव्यशरीरमात्रनिर्वर्तकत्वम् ।

क्वचित् 'चन्द्रम्' इत्येकस्मिन् पदार्थे वक्तव्ये 'अत्रेर्नयनसमुत्थं ज्योतिः' इति वाक्यवचनम् । क्वचित् 'निदाघशीतलहिमकालोष्णसुकुमारशरीरावयवा योषित्' इति वाक्यार्थे वक्तव्ये 'वरवर्णिनी' इति पदाभिधानम् । क्वचिदेकस्य वाक्यार्थस्य किञ्चिद्विशेषनिवेशादनेकैर्वाक्यैरभिधानमित्येवंरूपो व्यासः । क्वचिद्बहुवाक्यप्रतिपाद्यस्यैकवाक्येनाभिधानमित्येवंरूपः समासश्च । इत्येवमादीनामन्यैरुक्तानां न गुणत्वमुचितम्, अपि तु वैचित्र्यमात्रावहत्वम् ।

**—तेन नार्थगुणाः पृथक् ।। १६ ।।**

तेनोक्तप्रकारेण । अर्थगुणा ओजःप्रभृतयः प्रोक्ताः ।

इति साहित्यदर्पणे गुणविवेचनो नामाष्टमः परिच्छेदः ।

(अत्र मूलकारिकाः १६, पूर्वाभिः सह ६९४, उदाहरणानि ८, पूर्वैः सह ४९५)

Scanned with CamScanner